CAREERINDIA

# ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಲಿ
**ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – 560 003**

**KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD**
**Malleshwaram, Bengaluru – 560 003**

## 2023-24ರ ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಮಾದರಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆ
## S.S.L.C. MODEL QUESTION PAPER – 2023-24

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : First Language — SANSKRIT
## प्रथमभाषा — संस्कृतम्

ಸಮಯ : 3 ಗಂಟೆ 15 ನಿಮಿಷಗಳು ] **ವಿಷಯ ಸಂಕೇತ : 16-S**

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] **Subject Code : 16-S**

**CCE-RF : ಶಾಲಾ ವಿದ್ಯಾರ್ಥಿಗಳು / Regular Fresh**

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रति प्रश्नानां अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । तत्र पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

www.careerindia.com

[ Turn over

CAREERINDIA



**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'भुजङ्गः' अस्य समानार्थकपदम् इदं भवति ।

   (A) सर्पः (B) भुजः

   (C) जगत् (D) गजः

2. 'अनामयः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) मयः (B) आमयः

   (C) यमः (D) यमुना

3. 'राजकुमारः' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) राजकुमारा (B) राज्ञीकुमारः

   (C) राजकुमारी (D) राज्ञी

4. 'उदेति' अत्र एषः लकारः वर्तते ।

   (A) लङ् लकारः (B) लोट् लकारः

   (C) लृट् लकारः (D) लट् लकारः

www.careerindia.com

CAREERINDIA



5. 'कर्मणा' अत्र एषा विभक्तिः वर्तते ।

(A) तृतीयाविभक्तिः (B) चतुर्थीविभक्तिः

(C) पञ्चमीविभक्तिः (D) षष्ठीविभक्तिः

6. 'सतां सङ्गः कुमतिं दूरीकरोति' । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कथम् (B) काम्

(C) कुत्र (D) किमर्थम्

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. नद्यः – समुद्रेऽस्तं गच्छन्ति :: विद्वान् – .................... ।

8. वृत्रासुरः – राक्षसः :: दधीचिः – .................... ।

9. प्राणायामेन युक्तेन योगेन – सर्वरोगक्षयः :: अयुक्ताभ्यासयोगेन – ................ ।

10. रष्यादेशः – अणुविकिरणः :: आर्टिक् प्रदेशः – .................... ।

[ Turn over

www.careerindia.com

CAREERINDIA



**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. वृत्रासुरः स्वभावतः कथम् अवर्तत ?

12. सत्यव्रतशास्त्रिमहोदयः एम्.ए. पदवीं कुत्र प्राप्तवान् ?

13. भोजस्य पिता कः ?

14. मन्थरा कस्याः हृदयं निर्ममन्थ ?

15. चतुर्विधपुरुषार्थाः के ?

16. भारतमाता कैः पूजिता ?

17. भगवतः दर्शनेन पुलकितः ध्रुवः किम् अकरोत् ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. संस्कृतभाषाविषये डा० सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

20. नाट्ये कति रसाः भवन्ति ? ते के ?

21. कः आयुर्वेदः उच्यते ?

www.careerindia.com

CAREERINDIA



**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

 a) मुनिरिति ।

 b) सूर्यादेव ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

 a) नीलकण्ठः ।

 b) करीन्द्रः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

 a) देवाः च असुराः च =

 b) वर्षं वर्षं प्रति =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

 a) पुष्पेण विकसितव्यम् ।

 b) मुकुटं विधातुं यतिष्ये ।

www.careerindia.com

CAREERINDIA



25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकेन पाठः पठ्यते ।

b) अहं जलं पीतवान् ।

**VI. संस्कृतभाषया अनुवादं कुरुत । 1 × 2 = 2**

26. ಉದ್ಯೋಗವು ಮಾನವನ ಲಕ್ಷಣವಾಗಿದೆ. ಉದ್ಯೋಗದಿಂದಲೇ ಎಲ್ಲಾ ಕಾರ್ಯಗಳು ಫಲಿಸುತ್ತವೆ.

Employment is a characteristic of human being. Through employment everything is possible.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत । 1 × 2 = 2**

27. पुरा अयोध्यानगरेषु दशरथो नाम राजा आसीत् । तस्य रामः, लक्ष्मणः, भरतः, शत्रुघ्नः चेति चत्वारः पुत्राः आसन् ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत । 4 × 3 = 12**

28. ''सः महर्षिः धर्मात्मा उदारश्च ।''

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

www.careerindia.com

CAREERINDIA



29. ''शरणागतरक्षणं धर्मः, इति अस्माकं श्रद्धा ।''

    कः पाठः ? का अवदत् ? शरणागतः कः ?

30. ''सहसा वह्निम् आविश ।''

    कः पाठः ? के ऊचुः ? कम् ऊचुः ?

**अथवा**

''सागर इव तिष्ठतु ते यशः ।''

कः पाठः ? कः अवदत् ? कस्य यशः ?

31. ''अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।''

    कः पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. डा० के.एस्. नागराजन् ।

33. भासः ।



www.careerindia.com

CAREERINDIA



**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. यथा नद्यः स्यन्दमानाः

समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान् नामरूपाद्विमुक्तः

परात्परं पुरुषमुपैति दिव्यम् ।।

35. यत्र कुत्र वा वयं समग्रभारते स्थिता

भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।

आदितश्च मध्यतस्तथान्ततश्च भारता ।

भारतीयभावनेति वृद्धिमेतु भारते ।।

36. शिशुरेष त्वदोषज्ञः इति मत्वा दिनेश्वरः ।

कार्यं चात्र समायत्तमित्येवं न ददाह सः ।।

**अथवा**

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।

दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।।

www.careerindia.com

CAREERINDIA



**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. सौजन्यमेव सुवर्णम् ।

**अथवा**

मधुरं मधु पीयूषं तस्मात् तस्मात् कवेर्वचः ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. पुराणमित्येव न साधु सर्वम् ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. मनीषिणः सन्ति ..............................................................

.............................................................................. ।

.................................................................................

............................................................ हितं च दुर्लभम् ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः ? विवृणुत ।

41. 'नाट्यांशाः' इति पद्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

42. भगवान् रमणमहर्षिः स्वजीवनेन महर्षित्वं कथं दर्शितवान् ? विवृणुत ।

**अथवा**

कर्णस्य अस्त्रवृत्तान्तं शल्यः कथं ज्ञातवान् ? इति विवृणुत ।



www.careerindia.com

CAREERINDIA



**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. भगीरथः सूर्यवंशे जातः प्रसिद्धः राजा आसीत् । सः स्वपितॄणां सगराणां मोक्षप्राप्त्यर्थं उग्रं तपः आचरितवान् । तपसा ब्रह्मदेवं तोषयित्वा स्वर्धुनीं गङ्गां भूमिम् अवतारितवान् । प्रवाहात् भूमिं रक्षितुं शिवः गङ्गां स्वजटायां बद्धवान् । पुनः भगीरथस्य प्रार्थनानन्तरं सन्तुष्टः शिवः स्वजटायाः गङ्गां मुमोच । विभुक्ता सा गङ्गा सप्तधारासु प्रवहति । ताः धाराः एव सप्तस्रोतांसि इति कथ्यन्ते । तानि-ह्लादिनी, पावनी, नलिनी, सुचक्षुः, सीता, सिन्धुः, अलकानन्दा चेति ।

**प्रश्नाः**

i) भगीरथः कस्मिन् वंशे जातः ?

ii) भगीरथः किमर्थं उग्रं तपः आचरितवान् ?

iii) शिवः कां रक्षितुं गङ्गां स्वजटायां बद्धवान् ?

iv) सप्तस्रोतांसि कानि ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. विजयपुरमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा सहोदर्याः विवाहनिमित्तं दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

शैक्षणिकप्रवासार्थं धनं प्रेषयितुं पितरं/मातरं प्रति पत्रं लिखत ।

www.careerindia.com

CAREERINDIA



**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. परिसरमालिन्यम्, संरक्षणोपायाः च ।

**अथवा**

समाचारपत्रम् ।

www.careerindia.com

ROUGH WORK

www.careerindia.com